This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ श्रीमद्भ्यांसीतारामाभ्यांनमः॥ श्रीरुक्मिणीकृष्णायनमः॥ श्रीमतेलक्ष्मीनृसिंहायनमः॥
श्रीगोपालकृष्णायनमः॥ श्रीराधाकृष्णाभ्यांनमः॥ श्रीगंगायैनमः॥ श्रीयमुनायैनमः॥ सरस्वत्यैन
मः॥ चर्मण्वत्यैनमः॥ वेत्रवत्यैनमः॥ शिप्रायैनमः॥ नर्मदायैनमः॥ ताप्यैनमः॥ गोदावर्यैनमः॥ भीम
रथ्यैनमः॥ श्रीमतेसूर्यनारायणायनमः॥ महाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः॥ श्रीमन्ना
रायणायनमः॥ श्रीमहादेवायनमः॥ श्रीविष्णवेनमः॥ इष्टदेवताभ्योनमः॥ कोभवान्॥ केभवंतः॥
कुतोभवतामागमनं॥ कुतोभवानागतः॥ कुतस्त्वमागतः॥ कुतोयूयमागताः॥ किंयुष्माकंनाम॥
किंनामात्वं॥ काभवतांजातिः॥ काचभवतांज्ञातिः॥ क्वयुष्माकंस्थितिः॥ कोयुष्माकन्निवासः॥
कोयुष्माकमभिजनः॥ सर्वतःकुशलंकिल॥ कुशलिनःकिलयूयं॥ किमर्थमत्रागमनं॥ केनका

भा॰ १

Acc – ~~1093~~ M-1564
Title – भाषामंजरी.
Author – ?
Date – ?
Sub – भाषाशास्त्र.
folio – 17
Xerox – 34

KKSU LIBRARY
RAMTEK
441 106
M-1564
Dist. Nagpur

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येणयूयमत्रागताः॥ किंभवतांगोत्रं॥ युष्मत्पितॄणांकिन्नाम॥ कस्यपुत्रायूयं॥ कागतं॥ किमुद्देशे
नागमनं॥ कोयुष्माकंजनपदः॥ कस्माज्जनपदादागताः॥ अत्रागमनेनवयंसनाथीकृताः॥ वय
मनुगृहीतास्मः॥ विधेयोयंजनआज्ञापनेनानुगृह्यतां॥ कतिभवतांपुत्राः॥ काभवतामुपप
त्तिः॥ जानपदीकच्चित्पूर्वमारभ्यभवत्संपादितावाऽस्तिकिल॥ कोभवतांग्रामः॥ भवतांदेशेकः
तमानद्यलंकरोति॥ भवतांदेशेब्राह्मणाः सुखिनः संतिकिल॥ युष्मद्देशेराजाधार्मिकोस्तिकि
ल॥ किमागमनकार्यं॥ तद्ब्रूहि अहंशीघ्रमेवकरवाणि॥ भवादृशपुरुषदर्शनमलभ्यलाभः॥ भ
वत्समागमेनदैवोपपादितेनाभ्युदयोनुमीयते॥ कथं वृत्तं॥ ब्राह्मणोहं॥ क्षत्रियोहं॥ वैश्योहं॥
शूद्रोहं॥ चतुर्थवर्णोहं॥ वयंब्राह्मणाः॥ वयंक्षत्रियाः॥ कोसलदेशादस्माकमागमनं॥ काशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

देशात्॥ मालवदेशगत॥ अवंतिकाया॥॥ उज्जयिन्या॥॥ विशालायावयमागता॥॥ रामनामाहं॥ कृष्णशर्मा०
कृष्णवर्मा० गोपालशर्मा० गोपोलवर्मा० गोपालगुप्तः॥ गोपालदासः॥ महाराष्ट्रेभुदेशस्थ इतिप्रसिद्धोहं॥
चित्तपावनोहं॥ करहाटकोहं॥ त्रैलिंगाः॥ कर्णाटका॥ मैथिला॥ गौडाः॥ कान्यकुब्जाः॥ काश्यामस्माकं
स्थितिः॥ प्रयागे॥ मथुरायां॥ अवंतिकायां॥ दंडकारण्यदेशेस्मन्निवासः॥ अभिज्ञनोमहाराष्ट्रदेश॥
गुर्जरदेश॥ भवत्कृपयासर्वतः कुशलिनोवर्तामहे॥ श्रीभगवद्भवद्दयया सर्वतोस्माकंकुशलंजागर्ति॥
युष्मद्दर्शनार्थंकृपासंपादनार्थंचागतं॥ तदनुकार्यमपिनिवेदयिष्यामः॥ वसिष्ठगोत्रिणोवयं॥ कश्य
पगोत्रिणः॥ राजश्रियोपेतानांरामाजीत्याख्यपंडितानांपुत्रावयं॥ राजश्रीकृष्णाजीत्याख्याःस्मत्पितृ
णां॥ भवद्दर्शकृते देशेनगरेग्रामेचागतं॥ भवद्दयासंपादनोद्देशेन॥ पंचालाजनपदोस्माकं॥ मगधाः॥ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काशय::कोसला:। मालवदेशोस्माकं निवास:। कैथकैशिक देशादागता:।।महाराष्ट्रदेशात्।।हैहयदे खानदेश:
शात्।। मधुपुर्या।। मत्स्यदेशात्।। विराटनगरात्।। इंद्रप्रस्थादागता:।।हस्तिनापुरात्।। भवदाशिवापंच
पुत्रा:संति।। यदृच्छालाभसंतोषएव एतावत्पर्यंतमुपपत्ति:।।ज्ञानपदीसंपादयितुमिष्यते।। तदिच्छावि
षयप्रवृत्तिर्युष्मदधीना।।अयोध्याऽस्माकंनगरं।।कोसलदेशं सरयूरलंकरोतिघर्घरोनदश्च।। मधुरा
मधुरावापुण्यतम:प्रदेशएवास्माकंस्थानं।।तंचदेशंयमुनाभूषयति।।उज्जयिनीअवंतिकावास्म
न्निवास:।।तंचप्रदेशंशिप्रालंकुरुते।।पुण्यग्रामेस्माकंस्थितिर्यत्रमूलामूठयो:संगम:।।विठ्ठलपु
रमस्मद्ग्रामोयत्रश्रीमान्पांडुरंग:नदीचभीमरथीविराजते।।सौराज्येनसर्वएवात्रदेशेसुखिन:संति।।
अस्मद्देशोधार्मिकतमोराजाश्रीरामवर्माजगत्प्रसिद्धोभूत्।।सांप्रतंतुयुगानुरूपंसर्वं।।भगवदनुग्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ हेणास्मद्देशे सुभिक्षमस्ति ॥ पर्जन्योयथाकालमनुगृण्हाति ॥ अतएवसर्वस्वास्थ्यं ॥ किंतुभवत्कृपाकटाक्षापे
क्षास्ति ॥ इत्थं संभावितपुरुषैरेवसंवादमभ्युपयंति श्रीमंतो महाराजाः ॥ आवश्यककृत्यं विधाय प्राधान्येन
व भगवत्पूजां विदधाति ॥ पुराणेतिहासादिश्रवणं च ॥ प्रातरारभ्य मध्ये मध्ये राजकीया व्यवहारा अनुवर्तंते ॥ त
द्यथा ॥ कार्यभारिण आहूयंते ॥ अमात्यप्रभृतयः सर्वे आयांतु ॥ सेनापतिरायातु ॥ लेखनाधिकारिण
अश्व आयांतु ॥ वाजिशालाधिकारिणः ॥ गजशालाधिकृत आयातु ॥ इत्थमाज्ञापयंति ॥ पदातिवर्गाध्यक्षः
आहूयते ॥ गजा आनाय्यंतां ॥ अमुकनामा गज आनाय्यतां ॥ वाजिनामानयनमस्तु ॥ पदकुरीराध्यक्ष
आयातु ॥ उष्ट्रशालाधिकृत आयातु ॥ अमुकनामा महामात्रो हस्तिपको वा आकार्यतां ॥ अश्ववाराः
सादिन आयांतु ॥ पत्तयः पदातयो वा आयांतु ॥ लालाटिकोऽमुकनामा आहूयतां ॥ लालाटिकः ॥ २

S

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रभोर्माल्द रीकार्याक्ष्मश्वयः॥मस्त्या आहूयंतां॥ सेवका आयांतु॥ दौवारिका आयांतु॥ दूता आकार्यंतां॥
इत्थंतत्तदुक्त्वा॥चंदनागुरुनगरकेसरकस्तूरिकादिकिमंगेषुधृत्वाकमलंकुमुदंजातिर्जायीत्याख्याबकुलः
कदंबः माधवीवासंतीकेतकीकुंदमित्येवमादीन्भुक्त्वाकृष्णाच्चतुलसीत्यंतानपिपदार्थान् श्रीमद्भगव
दर्पितानेवोपयोज्यभोजनार्थमुपक्रमः॥तत्रपूर्वमेवभोक्तव्यंसघृतंसोष्णंहितंपथ्यंमितंतथेतिव्यास
स्मृतेः॥भिषगादिद्वारापरीक्षितानिद्रव्याणिउपस्थापयेत्॥यद्यपिसर्वमलव्यतः पथ्यमितिन्यायेना
पथ्यमप्युपयुज्यतेकदाचित्तथापिप्रायोदीर्घायुष्यादिफलसिद्धयेपथ्यापथ्यविवेकपूर्वकंपथ्योपाद
नमेवयुक्तंप्रेक्षावतां॥तेषमलंलघुस्वादुच्चपानीयमुपाददीत॥अमलंनिर्मलं॥लघुअगुरु॥स्वादु
मधुरंनक्षारं॥पानीयं॥उदकं।जलं।पाथ इत्याद्ययोजलपर्यायाः॥बाष्पकौपाद्यस्तज्ज्ञेदाः॥तत्रकौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ पं स्वादु प्रशस्ततरं॥ वृष्टिजलमपि त्रिरात्रमुषितं॥ अतएव देशभेदे प्रायेणमघोदकं संगृह्णंति॥ तत्तदृतु मा
सभेदेन नादेयादयोपि उदकभेदा वैद्यशास्त्रे प्रशस्तत्वेन प्रतिपादिता॥ यथाह सुषेणो॥ कौपं प्रास्रव
णं वसंतसमये ग्रीष्मे तु चौंड्यं भवेत्काले प्रावृषि नाभसं च सगुणं स्यादौद्भिदं वा पयः॥ नीहारे सरसीत
डागविषयं सर्वं शरत्संगमे सेव्यं सूर्यसितांशुरश्मिपवनव्याधूतदोषं पय इति॥ वृद्धसुश्रुतनिबंधे तु॥ पौ
षे वारि सरोजातं माघे तत्तु तडागजं॥ फाल्गुने कूपसंजातं चैत्रे चौंड्यं हितं मतं॥ वैशाखे नैर्झरं नीरं ज्ये
ष्ठे शस्तं तथौद्भिदं॥ आषाढे शस्यते कौपं श्रावणे दिव्यमेव च॥ भाद्रे कौपं पयः शस्तमाश्विने चौंड्यमे
व च॥ कार्तिके मार्गशीर्षे च जलमात्रं प्रशस्यते॥ इति॥ शिलाकीर्णं स्वयंश्वभ्रं नीलांजनसमोदकं॥ ल
ताविताने संछन्नं चौंड्यमित्यभिधीयते॥ अश्मादिभिरबद्धं यत्तच्चौंड्यमिति चापरे॥ विदार्य भूमिं ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निम्नांयंन्महत्याधारया स्रवेत्॥ तत्तोयमौद्भिदंनामवदंतीतिमहर्षयः॥ दिवारविकरैर्जुष्टं निशिशीतकरां
शुभिः॥ ज्ञेयमंभूदकंनामस्निग्धंदोषत्रयापहं॥ अन्यान्यपिनारिकेलोदकगुलाबोदकादीनितत्तन्नि
बंधेषुप्रसिद्धानि॥ वैद्योपदिष्टकालेउपयोक्तव्यानि॥ नद्यानदस्यवानीरंनादेयमितिकीर्तितं॥ तत्रश्री
भागीरथ्याः॥ शीतंस्वादुस्वच्छमत्यंतरुच्यंपथ्यंपाक्यंपाचनंपापहारि॥ तृष्णामोहध्वंसनंदीपनंचप्र
ज्ञांदत्तेवारिभागीरथीयं॥ अन्येपिनादेयभेदायमुनादिकानांसरिद्भेदानांग्रंथेषुप्रसिद्धाःयथासंभ
वंस्वशरीरप्रकृत्यानुकूल्येनपवित्रोदकोपादानमेवकर्तव्यं॥ भोजनपात्राणिचसुवर्णपात्रादीनि॥ तत्र
दोषत्रहृष्टिकृत्पथ्यंहैमंभोजनभाजनमितिस्वर्णमयमत्युत्तमंविशिष्टभाग्यशालिसुलभं॥ सर्वसाधार
ण्येनतुयथासंभवंराजतादीनिउपादेयानि॥ रंभापत्रादीनिच॥ रंभाकदली॥ जलपात्रेषुस्फाटिकंप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ ज्ञास्तं॥तदभावेराजनताम्रमयादि॥रूप्यादिपात्रेषुचपदार्थाःसूदैरुपस्थाप्यंते॥ओदनःभक्तंवा॥आढकसूपः॥
मुद्गसूपः॥माषसूपः॥गव्यंघृतं॥गव्यंदुग्धं॥गव्यंदधि॥माहिषंदुग्धं॥माहिषंदधि॥तक्रं॥कथिका॥शाका
निप्रायोदोषबहुलानीनिस्वल्पमात्रयोपयोज्यानितेषु॥बालंमूलं॥त्रिदोषघ्नं॥मूलंमूलकमितिप्रसि
द्धः॥कंदभेदः॥तच्चश्वेतमेवग्राह्यं॥मूलकंरक्तमूलकमितिनिषेधागोचरत्वात्॥आर्द्रकंशृंगबेरमित्ये
कोर्थः॥कदलीकंदः॥सूरणशाकं॥शृंगाटकःशोणितपित्तहारीलघुःसरोवृष्यतमोविशेषात्॥त्रिदोष
तापभ्रममोहहारीरुचिप्रदोमेहनदाढ्यहेतुः॥शिंगाडेंहंत्यम्लपित्तमरुचिंवमिंदाहमोहतृष्णामदक्लू
मरुरश्चसुशीनलंच॥कंठस्यशोषशमनंगुरुवातरक्तेक्षीणेचपथ्यमतिचारुकसेरुकंस्यात्॥कसेरु॥
आलूकंकंदः॥वास्त्क।वास्तुकं॥वास्तूकं॥बथुवाइतिलोके॥शिग्रुपत्रशाकं॥शेवग्याचीपत्रें॥पाल ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं॥ मारिषः॥ मरसा॥ तत्र हरिताद्रक्तः श्रेष्ठः॥ पुष्कलः॥ पोकला॥ उपोदकी॥ पोतकीच॥ कुसुंभशाकं॥ रो बडीशेप
तपुष्पापत्रशाकं॥ धान्याकं धान्यकं धान्यं तच्छाकं प्रसिद्धमेव॥ तंडुलीयकं॥ तांडुलजा॥ राजिकापत्रशा
कं॥ मोहरी॥ सर्षपपत्राणि॥ शिरसपत्र॥ घोला घोलिका॥ घोलिश्च॥ शाणशाकं॥ अंबष्ठा॥ अंबाडा॥
ओंवा मेथी॥ मेथिका च॥ श्वेतागस्त्यपत्रं॥ रक्तंच॥ पट्टशाकोनाडीकोनाडीशाकश्च॥ शिकेकायी॥ मूलकपत्र
शाकं॥ यवानीपत्रशाकं॥ चणकपत्रशाकं॥ चणकाम्लं॥ कलायशाकं॥ वाटाण्याचीपत्रें॥ शाकूटं॥
आलूपत्रं॥ करीरांकुरशाकं॥ वंशांकुरशाकं॥ कूष्मांडं॥ कर्कटी॥ उर्वारुकं॥ वालुकी॥ वाळकें॥ डिंडिश॥
तुंबी॥ दुधाभोपळा॥ कलिंगशाकं॥ कलिंगडें॥ खर्बुजं॥ दशांगुलफलं॥ हस्तिकोशातकी॥ राजकोशा दोडका
तकी॥ सूक्ष्मानानाजातीया॥ शिराकोशातकी॥ पारसदोडकी॥ पटोलपत्रं पित्तघ्नं नालं तस्य कफाप परवर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ ह॥ फलं त्रिदोषघ्नामनं मूलं च स्याद्विरेचनं॥ चिचिंडु॥ पडवळें॥ अपथ्या बाकुची॥ गोवारीच्या शेंगा॥ शिग्रु
मधुशिग्रुपुष्पाणि शिंबीशाकानि॥ अगस्त्यपुष्पशिंबीशाके॥ पनसमपक्वं पक्वं च तद्बीजानि च॥ तन्मज्जा
च॥ पनसावर्त॥ पनसपोली॥ लकुचफलं॥ बडहर इति लोके॥ तद्दाममपथ्यं पक्वमीषत्पथ्यं॥ तुंडी॥
तोंडवली॥ कारवेल्लं॥ कारली॥ कर्कोटकशाकं॥ करटोली॥ खेखसे॥ वृंताकानां भूयांसो भेदास्तेषु
कोमलं प्रशस्तं॥ तथा चोक्तं॥ वृंताकं कोमलं पथ्यं कूष्मांडं कोमलं विषमिति॥ तद्गरित्रं॥ भेंडाशाकं॥
भेंडी॥ कदलीभेदा बहव॥ करमर्द॥ करवंद॥ तिंदुक॥ टेंभरु॥ तेंदू॥ पिप्पल॥ अश्वत्थ॥ चलदल॥
अश्वत्थवृक्षस्य फलानि त्रिघानि॥ वटवृक्ष॥ प्लक्षो जटी। पलाश॥ किंशुक॥ पारिभद्रो निंबतरु॥
कांचनार॥ कांचनकस्तज्ज्ञेदेश्चकोविदार॥ उडुंबरो वृक्ष॥ तत्फलमपि केचिद्भक्षयंति नाविष्णुभि

या:॥नारिकेलफलमतिप्रसिध्धं॥तद्भेदाबहव:॥मोहाकोकणेप्रसिद्ध॥तस्यनाममाध्वीकमिति॥पूगीफ
लंक्रमुकं॥खर्जूरफलं॥खारीक॥पिंडाख्यखर्जूरक:॥पिंडखजूर॥द्राक्षागोस्तनीत्यादयोभेदा:॥बदरफल
भेदाअपिबहव:॥बीजपूरंमातुलिंगं॥नारंगं॥निंबूफलं॥जंबीरफलं॥मधुजंबीर:॥साखरनिंबू॥अम्लवे
तसफलंप्रसिध्धं॥कपित्थफलंपक्कंश्रेष्ठं॥लवलीफलंरायावल्ले इतिहरफारेवडी तिचप्रसिध्धं॥चार:
प्रियालु:॥चारोल्या इतिप्रसिद्ध:तत्फलबीजमज्जा॥बिल्वफलंहरिप्रियैर्नसेव्यं॥तथाचोक्तंधर्मशास्त्रे॥
वृंताकंचकलिंगंचबिल्वोदुंबरभि:सदा॥उदरेयस्यजीर्यंतेतस्यदूरतरोहरिरिति॥वृंताकंश्वेतवृंताकं॥
भिस्सटादग्धमन्नं॥भिस्सटेतिदीर्घपाठेतुसदर्थ:॥श्लेष्मातकं॥क्षीरिणीखीरिणीतिप्रसिद्धा॥चिंचा
फलंनानाविधं॥तिंतिणीफलमित्यपितन्नाम॥जंबूफलानिपक्कानिश्रेष्ठानि॥अंजीरंप्रसिध्धमेव॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ आर्द्रमरीचं व्यंजनोपयुक्तं॥ आर्द्रा॥ पिपल्योपि॥ करीरफलं नेपती इति प्रसिद्धं॥ जीवंती दोडी इति प्रसिद्धा॥ अ
क्षोटकं अक्रोट इति प्रसिद्धं॥ वातामो वादाम इति॥ सेवं प्रसिद्ध मेव॥ सीताफलं रामफलं चाव मेव प्रसिद्धं॥
हरीतकी॥ अनेकभेदा॥ बिभीतकं ब्याहाडे इति प्रसिद्धं॥ हरीतकी एका॥ बिभीतकद्वयं॥ आमलकं चतु
ष्टयमिति॥ त्रिफला औषधप्रकरणे प्रसिद्धा॥ आम्रफलानामनेके प्रभेदाः॥ तूत स्तूत इति॥ दाडिमफलान्य
नेकभेदानि॥ अमृतफलं नासपाती इति प्रसिद्धं॥ तस्य गुणाः॥ अमृतफलं लघु वृष्यं सुस्वादु त्रीन् हरेद्दो
षान्॥ देशेषु मुञ्जलानां बकुलं तल्लभ्यते लोके॥ कर्मरंगं कमरख इति प्रसिद्धं॥ एला॥ जीरकद्वयं॥ श्वेतं कृ
ष्णं च॥ हरिद्रा कांचनी पीता॥ हिंगु रामठं॥ शुंठ्यादयो व्यंजनसाधनभेदाः॥ शुंठी मरिचं पिप्पली चैत
त्त्रयं त्रिकटु॥ लवणानि तु॥ सैंधव सामुद्र सांभर सौवर्चलादीनि॥ त्वचं पत्रकं॥ दारुसिता दालचीनी॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याख्या॥ नागकेसरं कुंकुमं कस्तूरी लवंगं जातिपत्री जातीफलमित्यादयः सुगंधिद्रव्यभेदास्तच्चतुःसंभारोप
युक्ताः॥ चणकसाधिता मोदकादयः॥ मुद्गसाधिताः॥ माषसाधिताः। गोधूमसाधिताः॥ तिलसाधि
ताः॥ आर्द्रचणकसाधितामोदकादयो भूयांसः प्रकाराः॥ लाजा॥ लाह्या इति प्रसिद्धा यवगोधूमपावना
लादीनां॥ पावनालो ज्ञोनले इति प्रसिद्धः॥ महांस्तु यावनालो मक्का समुद्भवो मका इति प्रसिद्धः॥ उद्दाल॥
सज्जगुरेद्रुति॥ सक्तवः प्रसिद्धा एव॥ पृथुकाश्चपोहे इति॥ अर्धस्विन्ना गोधूमचणकादयो घुगण्या इति
सुभ्रष्टाश्चणकाः फुटाणे इति कृसरा दालितंडुलप्रभृतिसाधिता खिचडी ति॰ पायसं क्षीरिकेति च॥ से
विका सेवया॥ साराणि चिंचादि साधितान्यनेकभेदानि॥ मैदा सपीठ इति प्रसिद्धेन समितापदवाच्येन
गोधूमादिसूक्ष्मतरचूर्णेन साधिता बहवो भेदाः॥ लापसी मंडकः संयावः पक्वान्नभेद इत्यादयः॥ पोलि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९ कारोरिकाबहूनांधान्यानांभवंति॥पर्पटाअपिमाषादीनांभवंति पापड इति॥वटकाअनेकविधा॥॥शंकरपाले
इतिप्रसिद्धा॥॥शंखपाला॥॥फेनिकानानाविधा॥॥पूरिकाप्रसिद्धा॥॥पिष्टापूपाघारगे इति॥कुंडलिनी जिले
बी इतिप्रसिद्धा॥पूर्णगर्भापोलिकापूर्णपोली इति॥पिंडकादुग्धमया॥॥मुद्गलंमुगदल इति॥शर्करोदकंपा
नकमनेकप्रभेदं॥शिखरिणीबहुप्रभेदा॥गव्यंमाहिषंच॥नवनीतंप्रशस्तं॥अन्यान्यपिवैद्यशास्त्रेप्रसिद्धा
नि॥घृतेषुसद्योगोघृतंप्रशस्ततरं॥इक्षुविकारेषुसितोपला॥तिश्रेष्ठागुडशर्करादयोपिभेदायथायथं
तत्तत्प्रकारोपयुक्ता॥॥एतेषुभावेषुप्रसंगादभिहितेषुतत्तद्देशकालसंभवान्यथायथंसूदैरन्यैश्चउपस्था
पितान्यथारुचिवैद्योपदिष्टक्रमेण अनुभवितुंभोजनादौ॥अन्नंब्रह्मारसोविष्णुर्भोक्तादेवोमहेश्वरः॥
इतिसंचिंत्यभुंजानेदृष्टिदोषोनविद्यते॥अंजनीगर्भसंभूतंकुमारंब्रह्मचारिणं॥दृष्टिदोषविनाशार्थंहनु ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेतं स्मराम्यहं॥ इतिब्रह्मादीन् स्मृत्वा भोजनाग्रे सदा पथ्यं लवणार्द्रकभोजनं॥ अग्निसंदीपनं रुच्यं जिह्वाकंठ
विशोधनं॥ लवणमत्र सैंधवं॥ घृतपूर्वं समश्नीयात्कठिनं प्राक्ततो मृदु॥ अंते पुनर्द्रवाशी च बलारोग्येन मुंच
ति॥ तथा॥ अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसं॥ मध्येम्ललवणौ पश्चात्कटुतिक्तकषायकान्॥ इत्येवमा
दिभिषगुपदिष्टवर्त्मना भुंजीत॥ आहारं षड्विधं चोष्यं पेयं लेह्यं तथैव च॥ भोज्यं भक्ष्यं तथा चर्व्यं गुरुविद्याद्य
थोत्तरं॥ भुक्तस्यादौ जलं पीतं कार्श्यमंदाग्निदोषकृत्॥ मध्येग्निदीपनं शस्तमन्ते स्थौल्यकफप्रदं॥ कुर्या
त्क्षीरांतमाहारं न दध्यंतं कदाचन॥ इत्थं भोजनं विधायाचम्य जलयुक्ताभ्यां पाणिभ्यां चक्षुषी स्पृशेत्॥
भुक्त्वाचम्य स्मरेन्नित्यमगस्त्यादीन् सुखावहान्॥ अंगारकमगस्तिं च पावकं सूर्यमश्विनौ॥ यश्चैतान्संस्म
रेन्नित्यं भुक्तं तस्याशु जीर्यति॥ इत्युच्चार्य स्वहस्तेन परिमार्ज्य तथोदरं॥ अनायासप्रदायी नि कुर्यात्कर्माण्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंद्रित॥॥ ततःप्रसन्नेंद्रियचित्तवृत्तिरुत्क्रामपिप्लवाच शतंपदानि॥ सुकोमलेकल्पितचारुतल्पेसुखंविशेद्यामक

द्विर्नरेंद्रः॥ विदग्धाभिः सहस्त्रीभिस्तिष्ठेद्गोष्ठीरसंचरन्॥ निद्रासात्म्येथवानिद्रां नृपः कुर्याद्यथाविधि॥ रतौ

सुप्तोत्थितेस्नातेभुक्तेवांतेच संगरे॥ सभायांविदुषांराज्ञांकुर्यात्तांबूलचर्वणं॥ कर्पूरकंकोललवंगपूगजातीफ

लैर्नागरखंडपर्णैः॥ शुभ्राश्मचूर्णखदिरस्यसारंकस्तूरिकाचंदनचूर्णमिश्रं॥ तांबूलमेतत्प्रवदंतिराज्ञः

सौभाग्यदंकांतिसुखप्रदंच॥ भुक्त्वोपविशतस्तुंदः शयानस्यतुपुष्टता॥ आयुश्चंक्रममाणस्यमृत्युर्धावति

धावतः॥ श्वासानष्टौसमुत्तानस्तान्द्विः पार्श्वेतु दक्षिणे॥ ततस्ताद्विगुणान्वामेपश्चात्स्वप्याद्यथासुखं॥

वामदिशायामनलोनाभेरूर्ध्वोस्तिजंतूनां॥ तस्मात्तुवामपार्श्वेशयीतभुक्तपाकार्थं॥ श्वेतंडुकूलंमज्जा

सगोजोबलविवर्धनं॥ कफकृत्पित्तशमनंश्रमतृड्दाहनाशनं॥ मांजिष्ठंदाहकृच्चोष्णंकफवातानुलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकमित्यादीनि सुवर्णस्य॥ रूप्यं तु रजतं तारं चंद्रकांतिसितं शुभं॥१२

मतं॥ पट्टसूत्रमयं वस्त्रं त्रिदोषशमनं विदुः॥ कार्यविशेषे सुवर्णादिधातूनामुपयोगात्तेषामभिधानान्युच्यंते॥
तत्र॥ ताम्रमौदुंबरं शुल्बमुदुंबरमपि स्मृतं॥ रंगं बंगं त्रपु प्रोक्तं तथा पिच्चटमित्यपि॥ यशदं रंग सदृशं सीसं
स्यान्नागनामकं॥ लोहोस्त्री शस्त्रकं तीक्ष्णं सप्तैते धातवः स्मृताः॥ सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षि
कं॥ तुत्थं कांस्यं च रीतिश्च सिंदूरं च शिलाजतु॥ पित्तलं त्वारकूटं स्यात् दारोरीतिश्च कथ्यते॥ पारदो रसधा
तुश्च रसेंद्रश्च महारसः॥ चपलः शिववीर्यं च रसः सूतः शिवाह्वयः॥ गंधो हिंगुलमभ्रतालक शिलाः
स्रोतोंजनं टंकणं राजावर्तकचुंबकौ स्फुटिकया शंखः खटी गैरिकं॥ कासीसं रससकं कपर्द सिकता वोलश्च
कंकुष्ठकं सौराष्ट्री च मता अमी उपरसाः सूतस्य किंचिद्गुणैः॥ स्रोतोंजनं सुरमा॥ टंकणं। टांकणखार॥ सो
भाग्यसंज्ञकत्वात् सोहागा इति हिंदुस्थाने प्रसिद्धिः॥ स्फुटिका तुरटी॥ खटी॥ खडी॥ रसकं कलखापरी॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० खपरिया॥ धनार्थिनोजनाः सर्वेरमंते स्मिन्नतीवयत्। ततोरत्नमितिप्रोक्तं शब्दशास्त्रविशारदैः॥ रत्नंमणिर्द्वयो
रश्मजातौमुक्तादिकेपिच॥ रत्नानिभक्षितानिस्युर्मधुराणिसराणिच॥ चक्षुष्याणिचशीतानिविषघ्नानिघ्नत
नितु॥ मंगल्यानिमनोज्ञानिग्रहदोषहराणिच॥ किंरत्नंकस्यग्रहस्यप्रीतिकरत्वेनतद्दोषहरंभवतीतिप्रश्ने
तदुत्तरमाह॥ रत्नमालायां॥ माणिक्यंतरणेः सुजातममलंमुक्ताफलंशीतगोर्माहेयस्यचविद्रुमोनिग
दितः सौम्यस्यगारुत्मतं॥ देवेज्यस्यचपुष्परागमसुराचार्यस्यवज्रंशनेर्नीलंनिर्मलमन्ययोर्निगदिते
गोमेदवैडूर्यके॥ उपरत्नानिकाचश्चकर्पूराश्मातथैवच॥ मुक्ताशुक्तिस्तथाशंखइत्यादीनिबहून्यपि॥
उपरत्नानिगौणरत्नानि॥ विषंतुगरलंक्ष्वेडस्तस्यभेदाउदाहृताः॥ वत्सनाभः सहारिद्रः सक्तुकश्च
प्रदीपनः॥ सौराष्ट्रिकःशृंगकश्चकालकूटस्तथैवच॥ हालाहलोब्रह्मपुत्रोविषभेदाअमीनव॥ अ १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्क्षीरंस्नुहीक्षीरंतथैवकलिहारिका॥करवीरोथधत्तूरःपंचचोपविषाःस्मता॥॥उपविषाःगौणविषाणि॥
विषाणामुपविषाणांचवैद्यकोक्तरीत्याप्रयोगेसर्वामयहारकत्वंतत्रैवप्रसिद्धमन्यथानर्थकारित्वंलोके
पि॥तस्माद्धेयोपादेयपदार्थान्स्वयमभियुक्तास्तपुरुषद्वारावापरीक्ष्यैवोपाददीत॥ग्राह्या॥तादृशांच
पदार्थानांकेषांचिदेवसोकर्यायअभिधानेः॥पुनरुपन्यासः॥तद्यथा॥आम्रवृक्षाः॥पनसवृक्षाः॥नारि
केलतरवः॥क्रमुकावकुविधाः॥कदलीतरवश्चतत्रतत्रसंति॥बदरी॥जंबूः॥दाडिमी॥कदंबवृक्षाः॥बकु
लभूरुहाः॥पारिजाततरवः॥चंपकवृक्षाः॥बकुविधानिंबूतरवः॥पिचुमंदवृक्षाः॥नागरंगगुल्माः॥
केतकीगुल्माः॥स्वर्णकेतकीतद्भेदः॥शमीवृक्षाः॥धात्रीवृक्षाः॥तिंतिणी॥देवदारुतरवः॥चंदनवृक्षाः॥
रक्तचंदनं॥शुक्लागुरुतरवः॥कृष्णागुरुतरवः॥शाल्मली॥अशोकः॥ताल॥तमाल॥शाल॥सरल॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ अर्जुनः।धवः।खदिरः।भल्लातकवृक्षाः।भूर्जतरवः।वेतसाः।करंजवृक्षाः।गुग्गुलुः।अपामार्गगुल्माः।ना
धत्तूरः गकेसरं।भृंगराजतृणं।बृहतीगुल्माः।शृङ्गा।अर्कः।तुलसी।ब्राह्मी।मुंडी।दूर्वा।अपराजिता।पुनर्न
वा।गुडूची।गुंजा।नागवल्ली।कुंदपुष्पाणि।करवीरपुष्पाणि।असनकुसुमानि।पाटली।मंदारपुष्पाणि।
~~असनकुसुमानि।पाटली।मंदारपुष्पाणि~~।बंधूकपुष्पाणि।मालती।मल्लिका।दमनगुल्माः।मरु
गुल्माः।इक्षवः।कुशाः।काशाः।शराः।श्वेतदूर्वा।विष्णुक्रांता।नद्योनदाश्च बहवः।तत्र केचिदादा
वेव दर्शिता।पुष्करिण्यः।सरोवराणि।तत्र सहस्रपत्रशतपत्राणि।इंदीवराणि।कुमुदानि बहुवि
धानि।तत्र तत्र भूयस्यः पक्षिजातयः।गरुडजातिः।शरभाः।हंसाः।कंकाः।पिकाः।मयूराः।चातकाः।
चक्रवाकाः।खंजनाः।शुकाः।सारिकाः।चकोराः।जलकुक्कुटाः।कोयष्टयः।दात्यूहाः।कोरंडवाय ११

KKSU LIBRARY RAMTEK 441 106 M-1564 Dist. Nagpur

21

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साग्टध्रा॥॥ चाषा॥ पिंगल्ता हरिता॥ भृंगराज्ञा॥ पारावता॥ कपोता॥ सारसा॥ उलूका॥ सिंहा॥ व्याघ्रा॥
वनमहिषा॥ वृका॥ गोमायव॥ सृगाला॥ मृगाअनेकविधा॥ खड्गा॥ चमर्य॥ कस्तूरीमृगा॥ भल्लूका॥॥
मर्कटा॥ श्वान॥ ग्राम्या॥ पशवोगवादयन्नच्यंते॥ गाव॥ महिषा॥ महिष्य॥ अजा॥ एडकामेषा॥ वराहा॥
एतेआरण्याअपि॥ गजा॥ उष्ट्रा॥ अश्वा॥ रासभा॥ मार्जारा॥ मूषका॥ नकुला॥ सर्पा॥ भेका॥ छुंछुंद
र्य॥ सरटा॥ पल्य॥ वृश्चिका॥ मक्षिकानानाविधा॥ मशका॥ मत्कुणा॥ क्षुद्रा॥ भ्रमरा॥ पिपीलिका॥
मत्स्या॥ कूर्मोनक्रा॥ कर्कट॥ इत्थंभूयस्योजलचरजातय॥ जलौकस॥ जलमूषका॥॥ जलमनुष्या॥
नौनौकानरि॥ तद्भेदाबहव॥ नौचारिणोतीवकुशला॥ कैवर्तका॥ सांयात्रिका॥ पोतवणिक॥ नौव्यवसा
यिनोभूयांस॥ ब्राह्मणादीनामनेकेप्रभेदा॥ द्राविडा॥ गुर्जरा॥॥ आंध्रा॥ कर्णाटका॥ महाराष्ट्रा॥ सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रस्वता॥ कान्यकुब्जा गौडाश्चोत्कलमैथिला॥ चित्तपावना॥ करहाटका॥ माध्यंदिना॥ काण्वा॥ तैत्तिरीया॥
१२ आश्वलायना॥ माथुरा॥ मागधा॥ काशिस्था गयापाला॥ प्रयागवासिन॥ गंगापुत्रा नार्मदा इतिच
रव्याता॥ यामुना॥ अवंतीवासिन॥ अयोध्यासाकेतद्वारावेकार्थौ तद्वासिन॥ मायापुरीहरद्वारं गंगा
द्वारमुन्मत्तंगगंतद्वासिनः॥ कांची शिवकांची विष्णुकांचीचेति द्विविधा तद्वासिन॥ द्वारावती द्वारका द्वा
रवतीच॥ अयोध्यामथुरामायाकाशीकांचीअवंतिका॥ पुरीद्वारावतीचेति सप्तैता मोक्षदायिका॥
तद्वासिनः॥ तेषु विद्यातपःसंपन्नाश्रेष्ठा॥ तथाचोक्तं व्याकरणमहाभाष्ये॥ विद्यातपश्च योनिश्च एत
पोहीतो द्ब्राह्मणकारकं॥ तपःश्रुताभ्यांयोजाति ब्राह्मणएव स इति। स्मृत्यंतरेपि। न विद्यया केवलया तपसा
वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितं। इति। देशगोत्रप्रवरकृता अपि भेदा ब्राह्मण १२

23

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नां तत्र तत्र प्रसिद्धा एव ॥ क्षत्रियाणामपि पुराणादिषु सूर्य चंद्र वंश भेदेन देशभेदेन चानेके भेदाः ॥ प्रसिद्धा ए
व ॥ सांप्रतं कलिकाल माहात्म्येन तादृशास्तत्त्वैधुर्येपि क्षत्रियाभासानां भेदाः ॥ सूर्यवंशिनः ॥ रघुवंशिनः ॥ चंद्र
वंशिनः ॥ विसेनवंशिनः ॥ राणा ॥ राठोर ॥ कछवाहे पवार शिंधे भोसले इत्यादिभिः शब्दैः व्यपदिश्यंत एव ॥
मुख्य वैश्यश्शूद्रातिरिक्ता अपि त्रैवर्णिकातिरिक्तपरेण शूद्रशब्देन ॥ अनुलोम संकराः ॥ प्रतिलोम संकरा
स्तत्तत्संकीर्ण संकरा अपि स्मृतिषु प्रसिद्धाः ॥ तेषु चत्वारो वर्णा अनुलोम संकराश्च पूर्व पूर्वश्रेष्ठाः ॥ तेभ्यो
जघन्याः प्रतिलोम संकरास्तेभ्योपि तत्तत्संकीर्ण संकरा इति दिक् ॥ नीचा अपि नाना विधाः ॥ नापितादिय
कीर्तयः ॥ क्षौरकर्तारः ॥ कुंभकाराः ॥ लोहकाराः ॥ चित्रकाराः ॥ रंजकाः ॥ रजकाः ॥ तक्षाणो वर्धक्यः ॥ त्वष्टा च
जंतुपाल्ताः ॥ स्वर्णकाराः ॥ वणिजः ॥ हेलाबुकाः ॥ तांबूल विक्रेतारस्तांबूलिकाः ॥ सूदा नानाजातीयाः ॥ उत्तम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३ ज्ञातयोपि॥पाषाणभेत्तारः॥तक्षशिल्पिनः॥रसविक्रयिणः॥नानाविधैश्चसेवकारिणः॥हलकर्षकाः॥कुसुमोपजीवि
नोमालाकाराः॥जटिलास्तापसाविरक्ताइतिप्रसिद्धाः॥भैरवादिसेवकाः॥शिवनिर्माल्यग्रहीतारोगुरवइतिप्रसि
द्धाः॥नर्तकाः॥वैद्याः॥ज्योतिर्विदः॥मांत्रिकाउत्तमाअधमाश्च॥सर्पवैद्याः॥व्याधाः॥यवनाः॥मुद्गलप्रभृतयः॥चंडा
लाः॥वंशस्फोटकाः॥धीवराः॥निषादाः॥प्रासादकर्त्तारः॥इष्टकानिर्मातारः॥खर्परनिर्मातारः॥वल्लभ्यादिपदार्थ
निर्माणकुशलाः॥नानाविधपण्योपजीविनः॥रत्नतत्वपरीक्षकाः॥एवंव्यवहारसिद्धयेउत्तमाधमजातयः सं
स्कृतशास्त्रैर्निदर्शिताः॥तस्याएवज्योतिःशास्त्रप्रसिद्धमपिवस्तुकिंचित्किंचित्प्रदर्श्यते॥मेषः॥वृषभः॥मिथुनं
कर्कः सिंहः॥कन्यातुलावृश्चिकः धनुः मकरः कुंभः मीन इति द्वादशराशिचक्रं॥लग्नानामपिएतेव्यपदेशाः
भावाश्चद्वादश॥तनुः॥१॥धनं २ सहजः ३ सुखं ४ विद्यापुत्रश्च ५ अरिः ६ कलत्रं ७ निधनं ८ धर्मः॥राज्यं आयः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यय १२ इतिप्रसिद्धाः॥ मेषादिराशीनामीशाः सूर्योदयः सप्तग्रहास्तेषु मेषवृश्चिकयोरीशो भौमः॥ वृषतुलयोः भु
क्रः॥ कन्यामिथुनयोर्बुधः॥ धनुर्मीनयोर्गुरुः॥ कुंभमकरयोः शनिः॥ कर्कस्य चंद्रः॥ सिंहस्य श्रीमान्सूर्यनारा
यणः॥ सर्वेपि सिंहस्य वशोविनालिं। सूर्यचंद्रकुजबुधगुरुभृगुशनीनां मेषवृषमकरकन्याकर्कमीनतुलाः उच्च
स्थानानि॥ कन्याराहुगृहं प्रोक्तं मिथुनं तूच्चमुच्यते॥ ततः सप्तमं स्थानं केतुग्रहस्य। तत्तद्ग्रहाणामुच्चस्थानेभ्यः सप्तम भ्यः
स्थानानि नीचानि॥ सप्तविंशति संख्याकनक्षत्रचक्रस्य सपादनक्षत्रद्वयेन एकैको मेषादिराशिः संपद्यते
॥ तानि च नक्षत्राणि॥ अश्विनी भरणी कृत्तिका रोहिणी मृगशिर आर्द्रा पुनर्वसु पुष्याश्लेषा मघा पूर्वफल्गु
न्युत्तरफल्गुनी हस्तचित्रा स्वाती विशाखाऽनुराधा ज्येष्ठा मूल पूर्वाषाढोत्तराषाढाऽभिजिच्छ्रवण धनिष्ठा
शततारका पूर्वाभाद्रपदोत्तरभाद्रपदा रेवतीति प्रसिद्धान्यष्टाविंशतिरभिजित्सहितानि तद्विभागाभावेतु स २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१४ सविंशतिरेवयतत्र तराषाढाश्रवणयोरेवतन्नक्षत्रमंतर्गतं ॥ अमांतः पोर्णमास्यंतश्चद्विविधश्चांद्रः । सौरः
संक्रांत्या । नाक्षत्र स्तावन्नक्षत्रचंद्रभोगेनासावनस्त्रिंशताहोरात्रैर्ज्योतिःशास्त्रधर्मशास्त्रप्रसिध्दश्चतु
र्विधोमासः ॥ तेषांचैत्रवैशाखज्येष्ठाषाढश्रावणभाद्रपदाश्विनकार्तिकमार्गशीर्षपौषमाघफाल्गुन
संज्ञा द्वादशप्रसिध्दा ॥ उत्तरोत्तरागतिशीलमासपक्षिणः शुक्लः कृष्णश्चेति द्वौपक्षौ । पक्षयोश्चाप्रतिप
त्द्वितीयातृतीयाचतुर्थीपंचमीषष्ठीसप्तम्यष्टमीनवमीदशम्येकादशीद्वादशीत्रयोदशीचतुर्दशी
पंचदशीतितिथयः पंचदशावयवा ॥ शुक्लस्यपंचदशीपौर्णमासी । कृष्णस्यत्वमावास्या ॥ इत्थंपंचदश
भिस्तिथिभिरेकः पक्षस्ताभ्यां शुक्लकृष्णाभ्यामेकोमासः ॥ एवंद्वादशमासाः ॥ द्वाभ्यांमासाभ्यामेकः ऋतुः १४
ऋतवश्चहेमंतादयः ॥ हिमशिशिरवसंत ग्रीष्मवर्षाशरत्कस्तनतपनवनांमोहर्म्यमिष्टान्नपानैः ॥ सुरव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुभवराजंस्वद्विषोयांतुनान्नांदिवसकमलखज्ज्ञाशर्वरीरेणुपंके ॥ मार्गशीर्षपौषौहेमंत ॥ माघफाल्गु
नौशिशिरः ॥ मधुमाधवौचैत्रवैशाखौवसंत ॥ ज्येष्ठाषाढौग्रीष्मः ॥ श्रावणभाद्रपदौवर्षाः ॥ आश्विन
कार्तिकौशरत ॥ शिशिरादिऋतुत्रयंसौम्यायनमुत्तरायणं ॥ वर्षादिऋतुत्रयंयाम्यायनंदक्षिणाय
नं ॥ संकल्पादौतुमकरादिराशिषट्के द्वस्थितेभानौउत्तरायणव्यपदेशः ॥ कर्कादिषट्कस्थितेचसहस्रां
शौदक्षिणायनव्यवहारः ॥ असंक्रांतिमासोमलमासः सएवपुरुषोत्तममासः ॥ तथाचोक्तंज्योति
षे ॥ असंक्रांतिमासोधिमासः स्फुटःस्यात ॥ द्विसंक्रांतिमासः ॥ क्षयाख्यःकदाचित ॥ क्षयःकार्ति
कादित्रयेनान्यदास्यात्तदावर्षमध्येधिमासद्वयंच ॥ तस्यचोत्तरमासेंतर्भावः ॥ तथाचोक्तं ॥
सोंतर्भवतिचोत्तरेइति ॥ तादृशश्चक्षयमासस्त्वधिकषोडशशत १६०३ शाकेतीतः ॥ चतुश्चत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तदशशत१७४४शाक आगामी।। अयनद्वयेन संवत्सरः।। संवत्सरारंभो सर्वत्र चैत्र शुक्ल प्रतिपदि प्रसिद्धः।। तद्देवत्वात् संतिक

१५ स्त्रिंशदधिके नवरात्रारंभः।। शारदनवरात्रारंभस्तु आश्विन शुक्ल प्रतिपदि सर्वदेशेषु प्रसिद्धः।। तत्तत्कालेच विधे
यकर्माणि हेयानि च धर्मशास्त्रे ज्योतिःशास्त्रे वैद्यशास्त्रे च प्रसिद्धानि।। यावच्छक्ति विधिनिषेध परिपालन
मावश्यकं।। वस्तुतः श्रीमन्नारायणस्मरणं सर्वदेशे सर्वकाले यथासंभवं संपाद्यैव कृतकृत्यता भवति
सर्वेषां।। तदुक्तं स्मृत्यंतरे।। स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न कर्हिचित्।। सर्वे विधिनिषेधाः स्युरेतयोरेव
किंकरा इति।। अतः सर्वथा तत्त्रयति तथ्यं।। सर्वव्यवहारोपयोगिनी संख्या संस्कृतवाक्यैः प्रतिपाद्यते।। तद्य
था।। एकः।। द्वौ। त्रयः। चत्वारः। द्विप्रभृत्यनेकव्यपदेशः।। त्रिप्रभृति बहुवद् इति।। त्र्यादीनामंत्यमुत्तमं।।
तत्समीपमुपोत्तमं।। पंच। षट्। सप्त। अष्टौ। अष्ट इति वा।। नव। दश। पंक्तिरिति च। एकादश। द्वादश।। त्र
योदश।। चतुर्दश। पंचदश। षोडश। सप्तदश। अष्टादश।। एकोनविंशतिः।। एकान्नविंशतिः।। एकाद् १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नविंशतिरितिच। विंशतिः॥ विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः॥ संख्यार्थे द्विबहुत्वे स्तस्तासु
चानवतेः स्त्रियः इत्यमरः। एकविंशतिः॥ द्वाविंशतिः॥ त्रयोविंशतिः॥ चतुर्विंशतिः॥ पंचविंशतिः॥ षड्विंश
तिः॥ सप्तविंशतिः॥ अष्टाविंशतिः॥ एकोनत्रिंशत्। एकान्नत्रिंशदित्यादि पूर्ववत्॥ त्रिंशत्। एकत्रिंशत्।
द्वात्रिंशत्। त्रयस्त्रिंशत्। चतुस्त्रिंशत्। पंचत्रिंशत्। षट्त्रिंशत्। सप्तत्रिंशत्। अष्टात्रिंशत्। एकोनचत्वा
रिंशदित्यादि॥ चत्वारिंशत्। एकचत्वारिंशत्॥ द्विचत्वारिंशत्। द्वाचत्वारिंशदिति॥ त्रिचत्वारिंशत्॥ त्रय
श्चत्वारिंशदिति च॥ चतुश्चत्वारिंशत्। पंचचत्वारिंशत्। षट्चत्वारिंशत्। सप्तचत्वारिंशत्॥ अष्टाचत्वा
रिंशत्। अष्टचत्वारिंशत्। एकोनपंचाशत्। पंचाशत्। एकपंचाशत्। द्विपंचाशत्। द्वापंचाशदिति च॥
त्रिपंचाशत्। त्रयःपंचाशदित्यादि पूर्ववत्॥ चतुष्पंचाशत्। पंचपंचाशत्। षट्पंचाशत्। सप्तपंचाश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६ त।अष्टपंचाशत।अष्टापंचाशादिति।च।एकोनषष्टि।।षष्टि।।एकषष्टि।।द्विषष्टि।।द्वाषष्टिरित्यादिच पूर्ववत।त्रिषष्टि।।चतुःषष्टि।।पंचषष्टि।।षट्षष्टि।।सप्तषष्टि।।अष्टषष्टि।।एकोनसप्तति।।सप्तति।।एकसप्तति।।द्वासप्तति।।त्रयःसप्तति।।त्रिसप्तति।।चतुःसप्तति।।पंचसप्तति।।षट्सप्तति।।सप्तसप्तति।।अष्टसप्तति।।एकोनाशीति।।अशीति।।एकाशीति।।द्व्यशीति।।त्र्यशीति।।चतुरशीति।।पंचाशीति।।षडशीति।।सप्तशीति।।अष्टाशीति।।एकोननवति।।नवति।।एकनवति।।द्विनवति।।त्रिनवति।।चतुर्नवति।।पंचनवति।।षण्णवति।।षड्नवति।।सप्तनवति।।अष्टनवति।।एकोनशतं।शतं।एकाधिकं शतमेकशतमित्यादि।।एकंशतमितिकर्मधारयसमासेतु।एकस्यशतस्यप्रतीति।।यदिसंज्ञा।।एवं द्व्यधिकंशतंद्विशतमित्यादिपूर्ववत।शतानेकत्वविवक्षायांतुद्विशती त्रिशतीत्यादि।। १६

31

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सपादशतमित्यतः पंचविंशत्यधिकस्यसार्धशतमित्यतस्तत्पंचाशदधिकस्यशतस्यप्रतीतिः।दश
शतीसहस्रमित्युच्यते।सहस्राणिदशदशसहस्री अयुतमितिच।शतसहस्रमित्यनेनतुसहस्रा
णांशतमितिषष्ठीसमासेनलक्षमित्युच्यते।दशलक्षीतुप्रयुतमितिशतलक्षंकोटिः।कोटिदशकमर्
बुदमिति।तद्दशगुणमब्जमिति।एवमुत्तरोत्तरंदशगुणाउपचयेक्रियमाणेपरार्धमितिसंख्याविश्रांतिः।
प्रथमं।द्वितीयं।तृतीयं।चतुर्थंतुरीयंतुर्यमितिच।पंचमं।षष्ठं।सप्तमं।अष्टमं।नवमं।दशमं।एकाद
शं।द्वादशं।त्रयोदशं।चतुर्दशं।पंचदशं।षोडशं।सप्तदशं।अष्टादशं।एकोनविंशं।विंशं।विंशतितमं।
एकविंशं।एकविंशतितमं।द्वाविंशं।द्वाविंशतितममित्याद्यपिपूर्ववत्।त्रयोविंशं।चतुर्विंशं।पंचविंशं।ष
ड्विंशं।सप्तविंशं।अष्टाविंशं।एकोनत्रिंशं।त्रिंशं।त्रिंशत्तममित्याद्यपि।एकत्रिंशं।द्वात्रिंशं।त्रयस्त्रिंशं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टात्वारिंशत्तमं।

१८ चतुस्त्रिंशं। पंचत्रिंशं। षट्त्रिंशं। सप्तत्रिंशं। अष्टात्रिंशं। एकोनचत्वारिंशं। चत्वारिंशं। चत्वारिंशत्तममि

त्यादिश्च। एकचत्वारिंशं। द्विचत्वारिंशं। द्वाचत्वारिंशमित्यादिश्च। त्रिचत्वारिंशं। त्रयश्चत्वारिंशत्तमं।

चतुश्चत्वारिंशं। पंचचत्वारिंशं। षट्चत्वारिंशं। सप्तचत्वारिंशं। अष्टचत्वारिंशं। अष्टाचत्वारिंशं। अ

ष्टचत्वारिंशत्तमं। एकोनपंचाशं। एकोनपंचाशत्तमं। पंचाशं। एकपंचाशं॥

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

. २९५

पु. १६४

भाषामंजरीपत्र ३४

KKSU LIBRARY
RAMTEK
441 106
M-1564
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=25.06.20 13:51
,TRANSFERRED=2020/06/25 at 13:59:16
,PAGES=34
,TYPE=STD
,NAME=S0003222
,Book Name=M-1564-BHASHA MANJARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection